॥ ओ३म् ॥

आहारनिद्राभयमैथुनंच
सामान्यमेतत् पशुभिर्नराणाम्।
धर्मोहितेषामधिको विशेषो
धर्मेण हीना: पशुभि: समाना:॥

( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

दानार्थिनो मधुकरा
यदि कर्णतालैर्
दूरीकृता: करिवरेण
मदान्धबुद्ध्या।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्ग: पुनर्विकचपद्मवने वसन्ति।

( चाणक्य-नीति )

卐 वर्षम्-७ 卐 अंक:-२० ( १६२ ) 卐 १६ अप्रैलमास: २०१८ त: ३० अप्रैलमास: २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## शिक्षया मनुष्य: सृष्टयै नवदृष्टिं ददाति –मोहनभागवत

संवाददाता नवदेहली। राष्ट्रि स्वयंसेवक संघस्य सरसंघचालक मोहनभागवत उक्तवान यत् मनुष्यं मनुष्य निर्माणस्य मूले शिक्षा एवास्ति। मनुष्य: शिक्षाया माध्यमेन सृष्टिं नवीन दिशा ददाति।



यदि स: एतादृशं न करोति तर्हि बहुबरं सृष्टिगत समस्या तं विचलिते करोति।

स: राजघाट स्थित गाँधी स्मृति एवं दर्शन समितिषु शिक्षा संस्कृतिउत्थानन्यास माध्यमेन शिक्षायो नवाराचानाम् एवं अभिनव प्रयोजानां प्रदर्शनी ज्ञानोत्सव-2015 इत्यस्य उद्घाटन समारोहे उक्तवान ते उक्तवन्त: यत् समाज आधारित शिक्षांपुनरोद्धार:, ताषु आवश्यकतानुसार परिवर्तन कर्तव्यम्। अनया वयं सर्वे मिलित्वा कार्य कर्तव्यम् एवं नि:स्वार्थभावेन सर्वेषां सहायतामपि कर्तव्यम्। स्वार्थिजीवनं पशुताया प्रतीकोऽस्ति। जनमानस एव समाजे नूतन प्रविधिनां माध्यमेन शिक्षायां नवाचारस्य सृजनं करिष्यति। 8 अप्रैल पर्यन्तं प्रचल्यमान अस्यां प्रदर्शन्यां 12 राजस्य 60त: अधिक शैक्षणिक संस्था: भागं गृहीतवन्त: यो स्वीयं नवाचारान् प्रदर्शयति। केन्द्रिय पर्यटन व उड्डयन राज्यमंत्री महेन्द्रशर्मा उक्तवान यत् आयोजनमिदं शिक्षा एवं संस्कृतयोमध्ये विभेद:दूरीकारयति। अनेन राष्ट्रनिर्माणस्य लक्ष्ययपि पूर्णो भविष्यति। अनया अस्मान् एतादृशं जानानामावश्यकताऽस्ति यो देशस्य संस्कृतिं प्रति समर्पित भावेन कार्य करिष्यन्ति।

कार्यक्रमे शिक्षासंस्कृतिउत्थानन्यासस्य संयोजक दीनानाथवत्रा सहसंयोजक अतुलकोठरी ज्ञानोत्सव 2015 इत्यस्य समन्वयक ईश्वरदयाल कंसल, रामकृष्ण आश्रममिशनस्य अध्यक्ष स्वामि आत्माराम भर्तीविद्या भवनस्याध्यक्ष अशोकप्रधान, इन्द्रिरागाँधिविश्वविद्यालय रेवाड़ी कुलपति प्रो. एसपी बंसल, राष्ट्रियमुक्तविद्यालयीय शिक्षासंस्थानस्याध्यक्ष प्रो. सी.वी शर्मा समेत अन्य उपस्थिता: आसन्। प्रदर्शनीत: इतर शैक्षणिकसंगठनानां प्रमुख मिलित्वा पंचोपरि आगतवन्त: एवं विचारमंथनसत्रे भारते शैक्षणिक प्रथाषु सकारात्मकता आनयितुं एवं शिक्षाया नैतिकमूल्य, पर्यावरण, चरित्रनिर्माण विषयोपरि सरसंघसंचालक मोहनभागवतेन सह चर्चा अपि अभवत्।

## गीताश्लोकोच्चारण–प्रतियोगितायाः आयोजनम्

सिधरावली। राष्ट्रीय राजमर्ग संख्या-8 स्थित रमनमंजुलाविद्यामंदिरे श्रीमदभगवतगीतायामाधारित श्लोकोच्चारण प्रतियोगिता: आयोजनमभवत्। अस्मिन्नवसरे मुख्यातिथिरुपे संस्कृतभारती हरियाणा, हरियाणा संस्कृत अकादम्या उपाध्यक्ष डॉ श्रेयांश द्विवेदी उपस्थित: आसीत्। तत्रैव कार्यक्रमस्य अध्यक्षता



विद्यामंदिरस्य संचालक विद्यामंजुल कृतवती। समारोहे विशिष्टातिथिरूपे रमनमंजुलाफौंडेशनस्य सीईओ रविपाहुजा, राजकीय वरिष्ठमाध्यमिकविद्यालय सिधरावली जयभगवानकौशिक, सत्येन्द्रसत्यम उपस्थितौ आस्ताम्।

अस्मिन्नवसरे छात्रान् सम्बोधन समये अकादम्या उपाध्यक्ष




उक्तवान यत् गीता जीवनस्य सारोऽस्ति येषां विना जीवनविषये ज्ञातुं न शक्यते। गीताया: प्रत्येकस्मिन् श्लोके सदैव पथमार्गस्य विषये ज्ञानं भवति। गीता संस्कृते अस्ति अत: संस्कारानां ज्ञानं संस्कृतेव अस्ति। अस्मिन समय संस्कृतस्याध्ययनस्य आवश्यकस्ति। सर्वं शास्त्रमपि संस्कृते अस्ति। अत: सर्व संस्कृते अस्ति अनया अस्याधयनमावश्यकम्।

प्रतियोगिताया: शुभारम्भा: दीप्रज्वाल्य अभवत् । श्लोकोच्चारणे बालका: सम्यक रूपेण श्लोकोच्चारणं कृतवान्: येन कारणेन तेषां प्रशंसामपि अभवत्। निर्णायक रूपे संस्कृतभारती गुरुग्रामस्य संयोजकप्रमोदशास्त्री, राजकीयमहाविद्यालय जाटौलि स.प्रा.श्री सुनीलकुमार:, राजकीयवरिष्ठमाध्यमिकविद्यालय वोह, कलाया: संस्कृत प्रवक्ता अश्विनिशर्मा एवं संस्कृत शिक्षक धमेन्द्रशास्त्री आसन्। 1-5 पर्यन्तं बालकवर्गे रमनमजुलाविद्यामंदिर प्रथमम्, 6-8 रमनमंजुला विद्यामंदिर सिद्धरावली प्रथमम्, राजकीयवरिष्ठमाध्यमिकविद्यालय सिद्धरावलि द्वितीयं एवं लक्ष्मीवरिष्ठमाध्यमिक विद्यालय राठीवास तृतीयं स्थानं प्राप्तवन्त:। 9-12 वर्गे रा.मा.वि.सिद्धरावली प्रथमं, रमनमंजुला विद्यामंदिर सिद्धरावली द्वितीयं व रा.का.उ.वि. तृतीयं स्थानं प्राप्तवन्त:। सर्वे निर्णायका: सम्यक प्रदर्शन कर्तु: छात्रणां चयनं कृत्वा पुरस्कारं प्रदत्तवन्त:। अन्ते विद्यालयस्य प्राचार्या अनितागुप्ता सर्वेषां आभारं प्रकटितवती।

## संस्कृते बालसाहित्यसम्मेलनम्

कांचीपुरत:- संस्कृते बालसाहित्यम् इत्याख्यं 04 अप्रैलत: 06 अप्रैलं यावत् कांचीपुरस्थे श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयस्य संस्कृतसंस्कृतिविभागे




बालसाहित्यपरिशदा समायोजितम्।

संस्कृतोत्थानाय डॉ. सम्पदानन्दमिश्रमहोदयानां सर्वथा श्लाघनीयं कार्यं विज्ञाय विस्मितोऽस्मि। संस्कृतसंवादं काव्यामृतवर्षिणीं नीतिकल्पद्रुमं च सादरं समर्पितवानमेतषां करकमलेषु। अस्मिन् कार्यक्रमे संस्कृतध्वनिरद्धुत: श्रुत:। तिरुपतिसंस्कृतविश्वविद्यालस्य कुलपतिमहानुभावा: सर्वप्रियमबोधयन्। मान्या वर्षा शारदाजी मधुरं कर्णप्रियं वक्तव्यं सम्बोधनं प्रदाय सर्वानपि विजितवती। मान्या वरलक्ष्मीमहोदया ललितेन संस्कृतेन वचसा सर्वानप्यमोहयत्। मान्या श्वेताप्रजापतीमहोदया सुन्दरेण संस्कृताङ्गलवचसा बहुसुन्दरमबोधयत्। माननीयविपिनविहारीशतपथी-तन्मयभट्टाचार्य-

शेषभाग:द्वितीयपुटे

## भारतीयैकताप्रार्थना



डॉ अरविन्दकुमारतिवारी

यस्मिन् राष्ट्रे प्रणेतारः शेरते हे गुरो ध्रुवम्।
तस्मिन् राष्ट्रे तु नेतारो जायन्ते शोकदायिनः।।1

कुरुते राष्ट्रसेवां यस्तं निन्दन्ति मूढजाः।
स्तुवन्ति राष्ट्रसेवां यः कुरुते न कदाप्यहो!!2

हिन्दवो हिन्दुभिः रुष्टाः अन्ये रुष्टाः स्वदेशजाः।
अखण्डत्वं कथं हन्त खण्डतामागतं सखे!!3

एक एव वयं सर्वे देशसेवाप्रियाः जनाः।
भवेम प्रार्थये नैष भेदः कल्प्यतां नरैः।।4

कवयः विलिखन्त्वत्र यत्र तत्र मनस्विनः।
हिन्दवः सोदराः सर्वे राष्ट्ररक्षापरायणाः।।5

यवनाः सिक्खजाः सर्वे ईसाईमतलम्बिनः।
बन्धवः मानवैर्मान्या ये ये राष्ट्रस्य सेवकाः।।6

## संस्कृतम्

भगवन् जगदीश मदीयमिदं
विमलं प्रकरोषि चलं न मनः।।

व्यथितं रमते सदने न वने
न जने भजने सुहृदां वचने।
निजसंस्तवसंश्रणेऽनुदिनं
परनिन्दनकर्मरतं भगवन्! 1
भगवन् जगदीश---

कुविचारनदीसलिले सततं
अवगाहत एतदहो चपलम्।
बहुदुर्गुणदेशविहारि खलं
मदमत्तगजादिसमं भयदम्।।
2 भगवन् जगदीश--

तव मन्दिरमार्गमिदं नितरा-
मपहाय समेत्यपरेण पथा।
यदि नीयत एव मयात्र बलात्
परिधावति मां नयतीव पथ्थक्।।
3 भगवन् जगदीश---

अरितुल्यमिदं हृदये निहितं
सुजनं कुजनं दनुजं मनुते।
भवकाननसिंहसमं प्रबल-
मजितं सुखशान्तिहरं न मतम्।।
4 भगवन् जगदीश-- ,

अमलं न करोषि मदीयमिदं
सुमनस्तव नाम मुदा जपतः।
हृदये वससीव विभो कुरु मे
लघुताहहनं कष्ययाद्य हरे।।
5 भगवन् जगदीश---


**पाठकानां कृते सूचनाः-**

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-

Sanskrit samvad,
Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249


## मेरे रश्क-ए कमर इति गीतस्य संस्कृतानुवादः



संस्कृतानुवादकः
पंकज कुमार झा शोधच्छात्रः
श्री.ला.ब.शा.रा.सं., विद्यापीठम् नवदेहली

मे परमसुन्दरि ! तवाद्या दृष्टिः
दृष्ट्या मेलिता जातो मोदावहः-2
विद्युदिव च्युता जाता सिद्धा क्रिया
पावको ज्वालितः जातो मोदावहः
पात्रे सम्मेल्य सौन्दर्यमदाद्यतां
चन्द्रिका सस्मिता जातो मोदावहः

मे परमसुन्दरि !...........
1. निःशंका हि सा पुरा आगता
अथ यौवनं यौवनेन मिलितम् - 2
तस्याः नेत्रं मिलितं मे नेत्रेण हि
दृष्ट्वा युद्धमिदं जातो मोदावहः

मे परमसुन्दरि !............

2. अक्षिप्वासील्लज्जा प्रत्येकं मेलने
रक्तगल्लौ जातौ मेलनवार्त्तायाम् -2
लज्जया सा मम प्रश्नोपरि यदा -2
नतग्रीवा जाता जातो मोदावहः

मे परमसुन्दरि ! तवाद्या दृष्टिः
दृष्ट्या मेलिता जातो मोदावहः - 2
विद्युदिव च्युता जाता सिद्धा क्रिया
पावको ज्वालितः जातो मोदावहः
पात्रे सम्मेल्य सौन्दर्यमदाद्यतां
चन्द्रिका सस्मिता जातो मोदावहः

## गीतम्



**डॉ.रामविास सिंह**
एसो.प्रोफेसर संस्कृत विभाग
डी.ए.वी.पी.जी. कॉलेज देहरादून उत्तराखण्ड

कौति कोकिलो न माधवीवनेऽधुना
धुनोति मे मनोऽप्यसाम्प्रतम्।
नाद्य पुष्पिते वनेऽपि,
नैव राग-सत्क्षणेऽपि,
नो च लिम्पतीव वक्ति
कोऽपि भावहृद्व्रणेऽपि।
कुलीनता गता क्व साम्प्रतम्।
स्नेहसान्द्रतां निपीय,
सत्वबन्धुतां निलीय
कश्च राजते वसन्तके
सुखानि संविलीय।
पश्य पीतिमा वृणोति पर्णपातके
युगे हिताहितं न्वसाम्प्रतम्।
प्राणजीवनं प्रशस्य,
जीवजीवनं विशस्य,
साश्रुनेत्रयोरहर्निशञ्च
याति को विहस्य।
मौनमञ्जरीषु रक्षकस्य घातता
दृणाति मे मनोऽप्यसाम्प्रतम्।
पोषितोऽसुरोऽत्र केन,
तोषितस्सुरोऽपि केन,
स्वार्थपूर्त्तयऽसितीकृतो
जनश्च रे मलेन।
हनत! मानवोऽपि मा नवो विलोक्यते
नवा न वा गतिनुं साम्प्रतम्!

पुस्तक-समीक्षा

# प्रगतिशीलप्रकाशनेन नीतिकल्पद्रुमकाव्यम् प्रकाशितः

**डॉ.संजयचौबे**

डा.अरविन्दकुमारतिवारिवर्यस्य दिल्लीस्थप्रगतिशीलप्रकाशनेन सद्यः प्रकाशितं नीतिकल्पद्रुमाख्यं काव्यपुस्तकं पठित्वा मे मनोऽतीव प्रसन्नम्। समाजे कोऽपि समयः स्यात् नीतीनामभावः कदापि नासीत्। देशकालपरिस्थित्यनुरूपं नवीनाः सूक्तयो नवनवविचाराः सर्वदा मानवमनसि प्रस्फुटिताः भवन्ति। फलतोऽरविन्दकवेः पुस्तकेऽस्मिन्नपि सामयिकाः सार्वभौमिकाश्च नीतयः प्रस्फुटिताः भवन्ति। अत्र कविः मनोहरेण विधिना सरसभाषया नैकाः नीतीः प्रस्तौति। मानवस्य मूल्यामूल्ययोर्विवेचनं कुर्वन् स ब्रूते यत्-

अमूल्यस्तादृशो मा भूः क्रेता भूयान्न कश्चन।
अमूल्यस्तादृशो मा भूः क्रेता भूयान्न कश्चन।।41




काश्चन नीतयस्तु लोकधर्ममूला गभीराः भावाः अभिव्यञ्जयन्ति। यथा-

तावदेव घृतं पात्रे देयं यावन्न वर्तिका।
व्यथते श्रु यतां मित्र न प्रकाशोऽन्यथा भवेत्।।65

मैत्रीमाश्रित्यात्र कवेर्नवीनोपमा दृष्टिगता जायते। तस्य मन्तव्यमस्ति यत् स्वार्थमूला मैत्री एरण्डपादपसमा दुर्बला किञ्च निःस्वार्थमूला मैत्री शिंशपतरुसमा दृढा स्थिरा च भवति। यथा-

स्वार्थमूला तु या मैत्री सा त्वेरण्डद्रुमोपमा।
निःस्वार्थ या कृता मैत्री दृढा सा शिंशपोपमा।।47

कविः नकारात्मकचिन्तनवता प्रज्ञासम्पन्नेनापि जनेन परामर्शो नाभिवाञ्छति। अत एव स कथयति-

नकारोऽस्ति मुखे यस्य धीमतः श्रु यतां सखे।
तेन साकं कृता वार्ता न फलं लभते ध्रुवम्।।13

अर्थात् यस्य जनस्य सर्वदा नकारात्मिकाभिव्यक्तिर्भवति तस्य परामर्शः साफल्यं प्रति नोपैति।

क्वचित् कवेः श्रममहत्त्वविषयकं मतं नितरामेव स्पृहणीयतां भजते। तद्यथा-

धनुर्ज्याकृष्यते यावत् तावद् याति शरो ध्रुवम्।
यावच्छ्रमं करोत्येष तावत्तु लभते फलम्।।19

कविः सम्यक्तयेदं जानाति यद् यः साधारणे मार्गे गन्तुं शक्नोति सैव दुर्गमं मार्गमुल्लङ्घ्य लोके प्रतिष्ठां प्राप्स्यति। अत एव स भाषते-

यः प्रयाति सुखं नित्यं सामान्ये वर्त्मनि प्रियः।
दुर्गमं पर्वतं गच्छन् सैव लोके महीयते।।73

इत्थं कविः नीतिकाव्येऽस्मिन् मौनिता सुजनता नेतृत्वं कुतर्कता गुणमहिमा दोषदर्शितादिविषयेषु स्वविचारान् रोचकतया प्रकटीकरोति। वस्तुतः डा. अरविन्दः स्वाभाविकः कविर्वतते। स साधारणमपि कथ्यं स्ववर्णनाचातुर्येण मनोहरं कुरुते। तस्य काव्ये क्वचिदपि कृत्रिमता नावलोक्यते। सर्वत्र प्रसादस्य सौन्दर्यमभिलक्ष्यते। सहृदयैः काव्यरसास्वादनाय नीति नैपुण्याय च कवेः कृतिरियमवश्यमेव पठनीयेति दिक्।

# सम्पादकीयम्

सुरभारतीसर्मचनतत्पराः पीयूषवर्षिणः सुकवयः विद्वांसः सादरं नमो नमः।

भवतां सर्वेषां संस्कृतसेवकानां मधुरेण कृत्येन सम्पूर्णमपि जगदुपकष्तं भवति। देशे संस्कृतस्य विकासाय विभिन्नाः कार्यक्रमाः भारतीयां संस्कृतिं संस्कृतं च संवर्धयन्ति। सर्वत्र संस्कृतजयरवः श्रुतियुगं पावयतीवेति सन्दृश्यते। गतमासे सुरभारतीसमर्चकैः भवद्भिः संस्कृतस्य उत्थानाय किं चास्मिन् किं किं नवीनमाविष्कर्तुं शक्यत इति निभालितम्। क्वचित् संस्कृते मानवमूल्यान्वेषणं कृतम्, तु क्वचित् बालानां विकासाय संस्कृते बालसाहित्यसम्मेलनमायोजितम्। क्वचिदन्ये भारतीयताबोधका विषयाः परिशीलिताः। सत्यमेवैतत्। आभाति आधुनिकः समयः संस्कृतस्य। किन्तु कराले कलिकाले कुत्सितवृत्तयो दानवाः भारतीयां संस्कृतिं दूषयितुमपि यतमाना विलोक्यन्ते। तैः समाजानुरूपं न कार्यमनुष्ठीयते येन देशस्य एकता अखण्डा राष्ट्रियभावनाश्च प्रभाविता भवन्ति। वयं सर्वेऽपि देशसेवकाः निजदेशविकासाय प्रतिपलं चिन्तयेम यत् केन सन्मार्गेण राष्ट्रोत्थानं भवेत्। सर्वेऽपि भारतीयाः समाना एवेति विचिन्तयितव्यम्। अतः संस्कृते सन्निहितज्ञानविज्ञानानि नूनमेव नवभारतनिर्माणाय परिकल्पनीयानि। गीतायाः सदुपदेशः सर्वैरपि गीयते किन्तु न कर्मणा केवलं मुखारविन्देनेति विभाव्य रोदिति चेतः।

अस्तु हे राष्ट्रसेवकाः कवयः! भवन्तः स्वदेशविकासविषये स्वलेखनीम् उत्थापयन्तु। यतोहि कवयः क्रान्तद्रष्टारो भवन्तीति श्रुतम्। यदि भवन्त एव अलससिरोमणयः अवसरेऽस्मिन् भविष्यन्ति तदा कथं भारतं भारतं भविष्यति। विहाय स्वार्थं परमार्थं प्रकल्पयन्तो धीमन्तो भवन्तः भारतमातरं सेवन्तामिति कामयते संस्कष्तसंवादसम्पादिका।

जयतु संस्कृतं जयतु संस्कृतिः जयतु भारतम्।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

तमित् सखित्व ईमहे तं राये तं सुवीये। स शक्र उत नः शकदिन्द्रो वसु दयमानः॥6॥

अर्थ–सब मनुष्यों को उचित है कि सब सुख और शुभ गुणों की प्राप्ति के लिए परमेश्वर ही की प्रार्थना करें, क्योंकि वह द्वितीय, सर्वमित्र, परमैश्वर्यवाला, अनन्त शक्तिमान् ही उक्त पदार्थों के देने में समर्थ है।।6।।

यह उन्नीसवाँ वर्ग समाप्त हुआ।।

अगले मन्त्र में इन्द्र शब्द से ईश्वर और सूर्यलोक का प्रकाश किया है–

सुविवृतं सुनिरजमिन्द्र त्वादातमिद् यशः।
गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः॥7॥

अर्थ–इस मन्त्र में श्लेष और लुप्तोमपालङ्कार हैं। हे परमेश्वर! जैसे आपने सूर्यादि जगत् को उत्पन्न करके अपना यश और संसार का सब सुख प्रसिद्ध किया है, वैसे ही आपकी कृपा से हम लोग भी अपने मन आदि इन्द्रियों को शुद्धि के साथ विद्या और धर्म के प्रकाश से युक्त तथा सुखपर्वक सिद्ध और अपनी कीर्त्ति, विद्याधन और चक्रवर्ती राज्य का प्रकाश करके सब मनुष्यों को निरन्त आनन्दित और कीर्त्तिमान करें।।7।।

फिर अगले मन्त्रों में ईश्वर का प्रकाश किया है–

नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः।
जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि॥8॥

अर्थ–जब कोई पूछे कि ईश्वर कितना बड़ा है, तो उसका उत्तर यह है कि जिसका सब आकश आदि बड़े–बड़े पदार्थ भी घेरे में नहीं ला सकते, क्योंकि वह अनन्त है। इससे सब मनुष्यों को उचित है कि उसी परमात्मा का सेवन, उत्तम कर्म करने और श्रेष्ठ पदार्थों की प्राप्ति के लिए उसी की प्रार्थना करते हैं। जब जिसके गुण और कर्मों की गणना कोई नहीं कर सकता, तो कोई उसके अन्त पाने को सर्थक कैसे हो सकता है?।

आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः।
इन्द्र स्तोममिमं मम कृत्वा युजश्चिदन्तरम्॥9॥

अर्थ–इस मन्त्र में उपमालङ्कार है मनुष्यों को उचित है कि जो सर्वज्ञ जीवों के किये हुए वाणी के व्यवहारों का यथावत् श्रवण करनेहारा, सर्वाधार, अन्तर्यामी, जीव और अन्तःकरण की यथावत् शुद्धि का हेतु तथा सबका मित्र ईश्वर है, वही एक जानने वा प्रार्थना करने योग्य है।।9।।

फिर भी मनुष्य परमेश्वर को कैसा जानें, इस विषय का अगले मन्त्र में प्रकाश किया है–

# व्याकरणे गुणवृद्धी

-ललितेश गुप्ता
**संस्कृतविभागः, दिल्लीविश्वविद्यालयः**

पाणिनीयव्याकरणे आचार्यपाणिनिः व्याकरणशास्त्रस्य सरलतायै अनेकसंज्ञाः प्रयुज्यते, यासु गुणवष्टद्धी अपि अन्यतमे।

### गुणवृद्धयोः विधि

काशिकाकारः विधीयते – 'वृद्धि'शब्दः संज्ञात्वेन विधीयते प्रत्येकम् आदैचां। (आत् = आ, ऐच् = ऐ, औ) वर्णानां सामान्येन तद्भावितानाम्, अतद्भावितानां च।[1] जितेन्द्रबुद्धिमहोदयः अत्र भणति–**ते तद्भाविताः ये वृद्धिशब्देन उत्पादिताः।**[2] यथा–'औपगवः' (उपगोरपत्यम्), अत्र 'उपगु + अण्', इतिस्थितौ वृद्धिः भूत्वा 'औपगवः' सिध्यते, तस्माद् तद्भावितम्। ततोऽन्येऽतद्भाविताः।[3] यथा – शालीयः (शालायां भवः), अत्र तु 'शाला', अस्मिन् पदे पूर्वतः एव वृद्धिसंज्ञकशब्दः 'आ' विद्यते तस्मात् अतद्भावितम्। अग्रे काशिका उद्धरति 'गुण'शब्दः संज्ञात्वेन विधीयते प्रत्येकम् अदेङां (अत् =अ, एङ्=ए, ओ) वर्णानां सामान्येन तद्भावितानाम् अतद्भावितानां च।[4] तद्भावितानाम् उदाहरणमहित 'चेता', अत्र 'चि तृ' इतिस्थितौ गुणः भूत्वा 'चेता' इति भवति। अतद्भावितानाम् उदाहरणं 'पचन्ति' अत्र 'पच+अन्ति' इतिस्थितौ पररूपः गुणः तु भवति, परन्तु गुणः पूर्वतः एव वर्तते।

### गुणवृद्धयोः स्थाननिर्धारणम्

भट्टोजिदीक्षितमहोदयः निर्धार्यते यत् गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते, तत्र इकः इति षष्ठ्यन्तं पदम् उपतिष्ठते।[5] यथा 'भवति', अत्र 'भू अति' इतिस्थितौ 'ऊ' इकः स्थाने 'ओ' गुणः भवति। 'कारः', अत्र 'कृ + अ (घञ्)' इतिस्थितौ 'ऋ' इकः स्थाने रपरः भूत्वा 'आर' वृद्धिः भवति। अत्र पतञ्जलिः वार्तिकरूपे वदति – **इग्ग्रहणम् आत्वसन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम्**[6] यथा – 'ग्लायति' अत्र 'ग्लै' इतिस्थितौ 'ऐ' इक् न वर्तते, तस्माद् गुणः न भवति। 'यानम्' अत्र 'या इतिस्थितौ 'आ' इक् न भवति। अस्य अपवादरूपे सिद्धान्तकौमुद्यां विधानं दीयते – ध त्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः।[7] यथा 'लोलुव' अत्र 'लोलू अच्' अस्मात् स्थितेः पूर्वे अचि परतः यङस्य लुक् अभूत्। तदेवम् अचं निमित्तं मत्वा गुणः प्राप्नोति, तद् न भवति। महाभाज्येऽपि एतत् समर्थतयतः क्ङिति ये गुणवृद्धी प्राप्नुतः ते न भवतः।[8] यथा – 'चितः' अत्र 'चि + क्त (त)', इतिस्थितौ चिधातोः गुणः प्राप्नोति, 'क्त =त' प्रत्ययः कित् अस्ति, तस्मात् 'क्ङिति च' अनेन निषेधो भवति। दीधोवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतस्ते न भवतः।[9] यथा 'आदीध्यनम्', अत्र 'आदीधी + अन' इतिस्थितौ दीधीधातोः गुणः प्राप्नोति, परं न भवति।

### गुणवृद्धयोः मुख्यप्रयोगस्थलम्

सिद्धिकौमुदी भणति यत् अवर्णादचि परे पूर्वपरयोः एको गुणादेशः स्यात् संहितायाम्।[10] यथा –'रमेशः' अत्र 'रमा+ईशः' इतिस्थितौ 'आ, ई' तयोः स्थनो 'ए' गुणः एकादेशः भवति। पुनश्च तत्र उद्धरति–आत् ऐचि परे वृद्धिः एकादेशः भवति।[11] यथा – 'कृष्णैकत्वम्' अत्र 'कृष्ण + एकत्वम्', इतिस्थितौ (अ, ए), तयोः स्थाने वृद्धिः 'औ' एकादेशो भवति। एषः वृद्धिः गुणस्य अपवादः अपि अस्ति।

### पररूपयङ्यङ्लुकभसंज्ञाविषयेषु गुणः

अकारात् अपदान्तात् गुणे परतः पररूपम् एकादेशो भवति।[12] यथा – 'पचति' अत्र 'पच+अति' इतिस्थितौ चकारोत्तरात् अपदान्तात् अकारात् गुणे 'अ' परे पररूपः गुणः 'अ' भवति। यङि, यङ्लुकि च इगन्तस्याभ्यासस्य गुणो भवति।[13] यङि–'चेचीयते', अत्र 'चि चि य' इतिस्थितौ अभ्यासस्य 'चि' अस्य गुणः 'चे' भवति, यङि (य) परतः। यङ्लुकि–'जोहवीति'–अत्र 'जुहु+ति' इतिस्थितौ यङ्लुकि सति अभ्यासस्य 'जु' अस्य गुणः 'जो' भवति। उवर्णान्तस्य भस्य गुणो भवति तद्धिते परतः ।[14] यथा – 'बाभ्रव्यः', अत्र 'बाभ्रु+य', इतिस्थितौ भसंज्ञकस्य 'ब्राभ्रु' अस्य 'उ' स्थाने 'ओ' गुणः भवति। 'यचि भम्', अनेन 'बाभ्रु' अस्य भसंज्ञा भवति।

### परस्मैपदपरकस्य इडादिसिचः वृद्धिः

काशिकाकारः भणति – परस्मैपदपरे सिचि परतः इगन्तस्य अङ्गस्य वृद्धिः भवति।[15] यथा – 'अचैषीत्' अत्र' 'अ+चि+सीत्', इतिस्थितौ इगन्तस्य अङ्गस्य 'इ' अस्य वृद्धिः 'ऐ' भवति, परस्मैपदपरके (तिप् = त्) सिचि परतः। महर्षिपतञ्जलिः अत्र स्पष्टीकरोति **अन्तरङ्गम् अपि गुणम् एषां वृद्धिर्वचनाद बाधते।**[16] दीक्षितमहोदयः प्रस्तुयते यत् अतः समीपौ यौ लरौ तदन्तस्य अङ्गस्य अतः वृद्धिः स्यात् परस्मैपदपरे सिचि।[17] यथा– 'अक्षारीत्' अत्र 'अक्ष + रीत्' इतिस्थितौ लरौ समीपस्य अतः वृद्धिः भवति। काशिकायामपि विधानं प्राप्नोति – वदव्रजोः हलन्तानाम् अङ्गानाम् अचः स्थाने वृद्धिः भवति सिचि परस्मैपदे परतः।[18] यथा– 'अवादीत्' अत्र 'वद् + ईत', इतिस्थितौ 'वद्'अङ्गस्य अतः स्थाने वृद्धिः भवति। काशिकाकारः अग्रे वदति – इडादौ सिचि हलन्तस्य अङ्गस्य वृद्धिः न भवति।[19] यथा – 'अदेवीत्' अत्र 'अदिव् + ईत्' इतिस्थितौ हलन्तस्य अङ्गस्य 'दिव्' अस्य इकारस्य वृद्धिः न भवति। अन्यच्च – हमयान्तस्य क्षणादेः ण्यन्तस्य श्वयतेः एदितश्च वृद्धिः न स्यात्, इडादौ सिचि।[20] यथा– 'अग्रहीत्' अत्र 'अग्रह्+ईत्' इतिस्थितौ हकारान्तस्य अङ्गगस्य 'ग्रह्', अस्य वृद्धिः न भवति। ऊर्णोतेः इडादौ सिचि परस्मैपदरे पक्षे गुणः।[21] यथा – 'प्रौर्णवीत्, प्रौर्णावीत्' अत्र – 'ऊर्णु + ईत्' इतिस्थितौ पक्षे गुणः, पक्षे वृद्धिश्च भवति। हलादेर्लघोः अकारस्य इडादौ परस्मैपदपरे सिचि वृद्धिर्वा स्यात्।[22] यथा–'अकणीत्' अत्र 'कण्+ईत्' इतिस्थितौ हल् 'क्' आदेः लघोः अकारस्य वृद्धिः भवति।

### मिद्मृज्धात्वोः जुसि च परतः गुणवृद्धी

मिदेः इको गुणः स्यात् इत्संज्ञकशकारादौ प्रत्यये।[23] यथा–मेद्यति अत्र 'मिद्+श्यन्' इतिस्थितौ 'मिद्' अङ्गस्य गुणः भवति, शिति = 'श्यन् = य' प्रत्यये परतः। अजादौ जुसि इगन्तस्य अङ्गस्य गुणः स्यात्।[24] यथा 'अजुहवुः' अत्र 'अजुहु + उस्' इतिस्थितौ गुणः भूत्वा 'अजुहो + उस्', तदनन्तरं अवादेशादयः भूत्वा 'अजुहवुः' भवति। मृजेरिको वृद्धिः स्यात् धातुप्रत्यये परे।[25] यथा – 'मार्ष्टा' अत्र 'मृज्+तृच्' इतिस्थितौ मृजः इकः स्थाने रपरः भूत्वा 'आर्' वृद्धिः अभूत्।

### णिति, ञिति, किति प्रत्यये परतः वृद्धिः

ञिति णिति च प्रत्यये परे अजन्ताङ्गस्य वृद्धिः भवति।[26] यथा–'कारः' अत्र 'कृ+अ (घञ्)', इतिस्थितौ रपरः भूत्वा 'आर्' वृद्धिः भवति। उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परतः।[27] यथा–'पाकः' अत्र 'पच्+अ (घअ्)', इतिस्थितौ उपधायाः अकारस्य वृद्धिः 'आ' भवति। ञिति णिति च तद्धिते परे आचाम् आदेः अचः वृद्धिः स्यात्।[28] यथा 'गार्ग्यः', अत्र 'गर्ग + यञ् (य)' इतिस्थितौ आदेः अकारस्य वृद्धिः भवति, तद्धिते परतः अङ्गस्य आचाम् आदेः अचः स्थाने वृद्धिर्भवति।[29] यथा अत्र – 'नाडायनः' – 'नड्+आयन (फक्)', इतिस्थितौ आदेः अकारस्य वृद्धिः भवति।

### सार्वधातुकार्धधातुकयोः परतः गुणवृद्धी

सार्वधातुकार्धधातुकयोः परयोः इगन्तस्य अङ्गस्य गुणः स्यात्।[30] यथा– 'भवतः' अत्र 'भू + अतः' इतिस्थितौ 'उ' अस्य गुणः 'ओ' भवति, सार्वधातुकप्रत्यये (श=अ) परतः। जागर्तेर्गुणः स्यात् विचिण्णल्ङिभ्यो अन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च।[31] यथा – 'जागरयति' अत्र 'जागृ+णिच् (इ)' इतिस्थितौ कित्वत्वात् गुणनिषेधः प्राप्नोति, परम् एतत् सूत्रं गुणः करोति। पुगन्तस्य लघूपधस्य च अङ्गस्य इको गुणः स्यात्सार्वधातुकार्धधातुकयोः।[32] यथा – 'व्लेपयति' अत्र 'व्लीप् +इति' इतिस्थितौ पुगन्तस्य अङ्गस्य 'व्लीप्' अस्य गुणः भवति सार्वधातुकप्रत्यये 'तिप्' परतः। अभ्यस्तसंज्ञकस्य अङ्गस्य लघूपधस्याजादौ पिति सार्वधातुके गुणो न भवति।[33] यथा नैनिजानि' अत्र 'निनिज्+आनि', इतिस्थितौ अभ्यस्तस्य 'नि' अस्य गुणः भवति अजादौ पिति सार्वधातुके 'आनि' परतः। भू, सू, एतयोः सार्वधातुके तिङि परे गुणो न स्यात्।[34] यथा 'अभूत्' अत्र 'अभू+त् (तिप्)' इतिस्थितौ गुणः न भवति, सार्वधातुके तिङि (तिप्) परतः। अकारान्तस्य अङ्गस्य वृद्धिर्भवति लुकि सति हलादौ पिति सार्वधातुके।[35] यथा – 'यौति'–अत्र 'यु+तिप्' इतिस्थितौ उकारान्तस्य अङ्गस्य यु (उ) अस्य वृद्धिः 'औ' भवति, शपः लुकि सति, 'अदिप्रभृतिभ्यः शपः' अनेन सूत्रेण, हलादौ पिति सार्वधातुके 'तिप्' परतः। ऊर्णोतेर्विभाषा वृद्धिर्भवति हलादौ पिति सार्वधातुके।[36] यथा– 'प्रोर्णौति', 'प्रोर्णोति'। अत्र 'प्र+ऊर्णु+ति' इतिस्थितौ विकल्पेन वृद्धिः 'औ' भवति, 'णु' अस्य 'उ' स्थाने, हलादौ पिति सार्वधातुके 'तिप्' परतः। ऊर्णोतेर्गुणः स्यात् अपृक्ते हलादौ पिति सार्वधातुके।[37] यथा 'प्रोर्णोत्' – अत्र 'प्र+उर्णु+तिप् (त)' इतिस्थितौ 'णु' अस्य स्थाने 'ओ' गुणः भवति, अपृक्ते हलादौ पिति सार्वधातुके 'तिप्' परतः।

अतः भिन्नस्थानेषु भिन्नास्यवस्थाषु च वयं गुणवृद्धयोः विविधताम् अपश्याम।

**संदर्भसूची (Endnotes)**

1 काशिका (1/1/1) (वृद्धिरादैच्) 2 न्यास (1/1/1) 3 न्यास (1/1/1) 4 काशिका (1/1/2) 5 सिद्धान्तकौमुदी (34) 6 महाभाष्य (1/1/3) (वा.) 7 सिद्धान्तकौमुदी (2656) (न धातुलोप आर्धधातुके) 8 महाभाष्य (1/1/5) (क्ङिति च) 9 काशिका (1/1/5) (दीधीवेवीटाम्) 10 सिद्धान्तकौमुदी (69) (आद्गुणः) 11 सिद्धान्तकौमुदी (72) (वृद्धिरेचि) 12 काशिका (6/1/97), (अतोगुणे) 13 काशिका (7/4/82), (गुणो यङ्लुकोः) 14 काशिका (6/4/146), (ओर्गुणः) 15 काशिका (7/1/1), (सिचिवृद्धि परस्मैपदेषु) 16 महाभाष्य 7/1/1 17 सिद्धान्तकौमुदी (2330) (अतोल्रान्तस्य) 18 काशिका (7/2/3) (वदव्रजहलन्तस्याचः) 19 काशिका (7/2/4) (नेटि) 20 सिद्धान्तकौमुदी (2299) (ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्)

21 कारिका (6/1/6) (ऊर्णोतेर्विभाषा) 22 सिद्धान्तकौमुदी (2284) (अतो हलादेर्लघोः) 23 सिद्धान्तकौमुदी (2346)(मिदेर्गुणः) 24 सिद्धान्तकौमुदी (241) (जुसि च ) 25 सिद्धान्तकौमुदी (2473) (मृजेर्वृद्धिः) 26 सिद्धान्तकौमुदी, (254) (अचोऽञ्णिति) 27 सिद्धान्तकौमुदी (2282) (अत उपधायाः) 28 सिद्धान्तकौमुदी (1075) (तद्धितेष्वचामादेः) 29 काशिका (7/2/118) (किति च) 30 सिद्धान्तकौमुदी (2168), (सार्वधातुकार्धधातुकयोः) 31 सिद्धान्तकौमुदी (248)(जाग्रोऽविचिणण्ल्ङित्सु) 32 सिद्धान्तकौमुदी (2189)(पुगन्तलघूपधस्य च) 33 काष्ठिाका (7/3/87) (नाभ्यस्तस्याचि पिति सार्वधातुके) 34 सिद्धान्तकौमुदी (2224) (भूसुवोस्तिङि) 35 काशिका (7/3/89)(उतो वष्टद्धिर्लुकि हलि) 36 काशिका (7/3/90) (ऊर्णोतेर्विभाषा) 37 सिद्धान्तकौमुदी (2448) (गुणोऽपृक्ते)

# व्याकरणशिक्षणस्य आवश्यकता

-कल्पेश्वरबहुगुणा
शोधच्छात्रः
श्रीला.ब.शा.रा.सं.विद्यापीठम्
नवदेहली-१६

मानवेन भाषायाः प्रयोगः व्यवहारसम्पादनाय क्रियते। सुष्ठु भाषाप्रयोगेण स वाक्चातुर्यं लभते। अनेनैव व्याकरणस्य ज्ञानं सम्भवति।[1] भाषायाः विशुद्धप्रयोगाय व्याकरणस्य ज्ञानम् अवश्यमेव करणीयम्। उक्तञ्च-

**यद्यपि बहुनाधीते तथापि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।**
**शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे।**
**बन्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना॥**

वर्णस्वरदोषरहितशब्दप्रयोगार्थमेव भाज़ायां व्याकरणाध्ययनं क्रियते। लोकव्यवहारेषु तदेव साफल्यं प्राप्यते यदा शुद्धभाषाप्रयोगविवेकः भवति। अत्र वैशिष्ठ्येन व्याकरणस्य आवश्यकता मनसि निधाय किञ्चत् विवेचनं प्रस्तोतुं शक्यते।

वस्तुतः संस्कृतव्याकरणस्य परम्परा अस्माकं देशे प्राचीना वर्तते। तस्य अक्षुण्णत्वं विद्वद्भिः वैयाकरणैः गीयते। अद्यत्वे अयं प्रश्नः उदिते यत् संस्कृतपाठशलासु विद्यालयेषु महाविद्यालयेषु च विश्वविद्यायेषु व्याकरणशिक्षाविषये कियद् अवधानं दातव्यम्। पाठशालासु संस्कृतमहाविद्यालयेषु च यत्र प्राचीनपद्धत्या अनुसरणं क्रियते तत्र व्याकरणस्य पाणिनीयपरम्परा एव उत्तमा परम्परा वर्तते।वैयाकरणं पाणिनिं प्रति वयं सर्वे कृतज्ञाः भवामः।[2] विद्यालयेषु महाविद्यालयेषु च अस्मिन् प्राचीनव्याकरणस्य आवश्यकतायाः विषये कानिचन मतानि सन्ति तेषामुल्लेखोऽस्ति क्रियते। व्याकरणस्यावश्यकतायाः त्रीणि मतानि एवं सन्ति-

**१. व्याकरणातिरेकमतम्।**
**२. अव्याकृतिमतम्**
**३. समन्वयात्मकं मतम्।**[3]

**१. व्याकरणातिकमतम्-**

व्याकरणस्यावश्यकतायाः विषये विद्वद्भिः निम्नोक्ताः परामर्शाः प्रस्तूयन्ते-

**क.** व्याकरणं प्राधान्येन औपचारिकं प्रशिक्षणं (Formal Training) मानसिकानुशासनञ्च (Mental Discipline) प्रदादाति। सूत्राणां कण्ठस्थीकरणे पर्याप्तं मानसिकम् अभ्यासकार्यं प्राप्यते येन स्मरणशक्तेः, तर्कशक्तेः सूक्ष्मचिन्तनस्य, सम्पूर्णनिरीक्षणशक्तेश्च विकासो भवति।

**ख.** व्याकरणद्वारा भाषायामधिकारप्राप्तिर्भवति।

**ग.** व्याकरणाध्ययने यत्प्रशिक्षणं लभ्यते तस्य स्थानान्तरणं (Transfer Of Training) जीवनस्य विविधपक्षोष्वपि भवितुं शक्यते। स्मृतिबृद्धेः यः प्रयोगः व्याकरणे क्रियते तदपि इतरक्षेत्रेषु सहजतया प्रयुज्यन्ते।

**घ.** विविधतर्कवितर्कसम्प्रत्ययेषु इयं प्रक्रिया बलं प्रदर्शयति। येन माध्यमेन शीघ्रमेवालोचितपक्षाणामवाप्तिर्भवति।

**२. अव्याकृतिमतम्-** व्याकरणस्यालोचकाः भाषायां कौशलं प्राप्तुमपि व्याकरणस्योपगोगितां नाभ्युपगच्छन्ति। तेषां पक्षाः निम्नोक्ताः सन्ति-

**य.** यदि भाषाध्यापनं मौखिकविधिना संरचनात्मकोपागमेन (Structural Approach) कार्यते तर्हि व्याकरणशिक्षणस्यावश्यकता एव न भविष्यति। अत एव नियमानां स्वरूपं विहाय शुद्धरूपाणां वारं वारम् अभ्यासः कारणीयः। **ओटो जेस्पसेन** (Auto Jesperson) महोदयस्य मतमस्ति यत् भाषायाः व्याकरणे बहवः तादृशा अंशाः भवन्ति येतां न्यूनतया एव प्रयोगो भवति व्यवहाकाले।

**र.** भाषाया अध्ययनं व्याकरणात्पूर्वमेव क्रियते।[4] अत एव उत्तरवस्थायां व्याकरणशिक्षणं केवलं बौद्धिकी क्रीड़ा एव वर्तते।

**ल.** व्याकरणमतीव शुज़्कः नीरसः दूरूहश्च विषयः भवति। यदा संस्कृतच्छात्राः प्रारम्भकालादेव व्याकरणस्य विभक्तिरूपाणि कारकनियमाश्च पाठ्यन्ते तद ते संस्कृताध्ययनं प्रति निरुत्साहिनः भवन्ति। प्रारम्भिककक्षास्तरेषु व्याकरणाध्यापनम् एकम् अवधानपूर्णकार्यं मन्यते। सुप्रसिद्धशिक्षाशास्त्रिभिः **बेलार्डमहोदयैः** उक्तम्- 'व्याकरणस्य ज्ञानार्जनाय भाषा ज्ञानस्यापेक्षया विशिष्टकुशाग्रबुद्धे आवश्यकता प्रतीयते।'

**व.** बालकः यत्किमपि वदति। तस्मिन् विषये प्रथमतया स विचिन्तयति। चिन्तनानन्तरं वक्तुं प्रभवति। अत एव भाषायाः पूर्वमेव तेन व्याकरणं स्वव्यवहारे प्रयुज्यते।

**३. समन्वयात्मकं मतम्-** आधुनिकव्यावहारिकचिन्तने व्याकरणस्यावश्यकतायाः विषये मतान्येतानि आलोच्यन्ते-

**अ.** व्याकरणद्वारा भाषायाः प्रमुखाधारः निर्मीयते। भाषाणशक्तिः, भाषणे प्रवहः गतिः स्वराघातादीनां तत्त्वानां विषये व्याकरणं निरपेक्षभावेन तिष्ठति। व्याकरणमाध्यमेन विचाराणां भावानामुत्पत्तिः नैव जायते। व्याकरणेन विचाराणां सुव्यवस्थितं रूपं ज्ञातुं न शक्यते।

**ब.** प्रशिक्षणस्य स्थानान्तरणाय व्र्‌ाकरणं नैव पाठ्यते। व्र्‌ाकरणाय व्याकरणपाठनमपि व्यर्थमेव भाति।

**स.** व्याकरणस्य अत्यावश्यकः भागः पाठनीयो भवति। येन भाज़ायाः शुद्धप्रयोगक्षमतायाः विकासो भवति। यथा सप्तमीकक्ष्यायां निम्नोक्तांशानां पाठनेन को लाभः?

**१. प्रगृह्यम्**
**२. कष्ट, रै, यकृदादयः प्रातिपदिकरूपाणि,**
**३. घु,रि,लरज्- एतादृश्यः अनुपयोगिन्या क्रियाः।**

एकदा सुप्रसिद्धेन भाषावैज्ञानिकेन **डॉ. सिद्धेश्वरवर्मामहोदयेन** उक्तं यत् 'स्तः' इत्यस्य पदस्य प्रयोगो यदा समस्तकादम्बर्यामेव नास्ति तर्हि बालकानां पाठ्यक्रमे किमर्थं स्थापनीयम्?

**द.** आदौ एव व्याकरणस्यारम्भः नैव सुगमतां प्रतिपादयति। पूर्वं तु भाषायाः सामन्यज्ञानं छात्राणां कृते दातव्यं भवति। प्रारम्भिकेषु षण्मासेषु संस्कृतभाषणकौशलस्याभ्यासः कारणीयः। तदनन्तरं सुगमरूपाणां विश्लेषणं कारणीयम्। प्रारम्भिकावस्थायां मोखिककार्यविषये पाठ्यपुस्तकद्वारा भूमिकानिर्माणं स्यात्।

**प.** पारिभाषिकपदानां शिक्षणं सद्य एव नारम्भणीयम्। वर्णपदवाक्यसन्धिसंयोगविभक्तिकारकसंज्ञासर्वनामविशेषण-

क्रियाव्ययगुणधातूच्चारणस्थानप्रयत्नादेशलिङ्गवचनपु/षलकारादीनाम् उपसर्गप्रत्ययानाञ्च शिक्षणं उच्चप्राथमिककक्ष्यास्तरे पाठसंयोगेनैव कर्तुं शक्यते।

**फ.** व्याकरणशिक्षणस्य कश्चन क्रमः स्यात् संरचनानां साहाय्येन शिक्षणकार्यं करणीय। यथासम्भवं नियमान् विना एव पाठनीयम्। उच्चस्तरीयकक्ष्यासु गुण-वृद्धि-सम्प्रसारण-आभ्यन्तरप्रयत्न-बाह्यप्रयत्न-घोषाघोषश्वास-नाद- स्पृष्टतद्धितादीनां प्रत्ययानाञ्च शिक्षणं स्यात्।

**ब.** व्याकरणनियमानां बोधनं तालिकाचित्रादीनां साहाय्येन करणीयम्। अत्र या सूची प्रदर्श्यते तस्याः चित्रमाध्यमेन प्रस्तुतीकरणं समीचीनं भविष्यति-

**१. स्वरव्यञ्जनतालिका।**
**२. विविधवर्गाणां (कु चु टु तु पु) तालिका।**
**३. उच्चारणस्थानानि।**
**४. स्थानप्रयत्नकोज़्ठकानि।**
**५. सन्धीनां प्रभेदः।**
**६. दीर्घसन्धेः चित्रम्, यण्सन्धेः चित्रं, गुणसन्धेश्च चित्रम्।**
**७. स्वरान्तवृद्धिसन्धिचित्रम्।**
**८. स्वरान्तपुंलिङ्गनपुंसकलिङ्ग-स्त्रीलिङ्गादीनां चित्राणि।**
**९. विभक्तीनां चित्राणि।**
**१०. युष्मदस्मद्विभक्तीनां चित्राणि।**
**११. संख्यावाचकशब्दानां चित्रम्**
**१२. भ्वादीनां दशगणानां चित्रम्।**
**१३. लडादीनां पञ्चलकाराणां चित्रम्।**
**१४. धातूनां लकारेषु विद्यमानानां पुरुषाणां वचनानाञ्च चित्रम्।**
**१५. समासप्रभेदानां चित्रम्।**
**१६. द्वन्द्वसमासभेदानां चित्रम्।**
**१७. तत्पुरुषसमासस्य सोदहारणाः प्रभेदाः।**
**१८. प्रमुखतद्धितादीनां चित्राणि।**
**१९. कृदन्तानां सोदहारणानि चित्राणि।**
**२०. लिङ्गपरिवर्तनस्य चित्रम्। इत्यादीनि।**

स्पष्टमिदं यद् व्याकरणस्य ज्ञानं भाषासम्प्रेषणार्थं भाषाप्रयोगार्थञ्च आवश्यकमिति। छात्राणां कृते शिक्षकाणामिदं कर्तव्यं भवति यत् स्तरानुगुणं ते व्याकरणशिक्षणस्य आवश्यकतां मनसि निधाय शिक्षणकार्यं कुर्युः। व्याकरणस्योपयोगिता तस्य प्रयोगेषु अभ्यासेषु एव निश्चिता भवति। सरलमार्गेण, सहजरीत्या च व्याकरणस्य प्रयोगाः करणीयाः।

**(Footnotes)**

1. Grammar is a practical analysis of language : Dr. Sweet

2.येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः। पाणिनीयष्ठिाक्षा, श्लो. 57

3. संस्कृत शिक्षण- डॉ. रघुनाथ सफाया, पृ. 357

4. Nobody should study the grammar until he knows the language........... Auto Jesperson.









# पुराणेषु वास्तुशास्त्रस्वरूपम्

कन्हैयाकुमारझा (शोधच्छात्रः)
वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

पुराणमेकमनेकं वेत्यस्यस्मिन् विषये चिन्तयता भगवता वेदव्यासेनोक्तं मत्स्यपुराणे-

**पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघ ।**
**त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ।।**[१]

अर्थात्कल्पादौ पुराणमेकमेवासीत् परं कल्पान्तरेषु त्रिवर्गसाधनात्मकं पुण्यप्रदञ्चेदं शतकोटिशु विस्तृतमभवदिति। तद्विशयेवयं जानीमो यदष्टादश पुराणानि, अष्टादश महापुराणानि, अनेकाण्युपपुराणानि-उपौपपुराणानि च विलसन्त्यस्मिन् धरातले। तेन पुराणानामनेकत्वं सुस्पष्टमेव प्रतिभाति। अपि च अन्यान्यपि मतानि पुराणेषु वेदप्रतिपादकानि सन्ति। यथा- **पुरा नवं भवति पुराणम्।**[२] **जगतः प्रागवस्थाम् अनुक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्।**[३] **सर्ववेदार्थसाराणि पुराणानीति भूपते।**[४]

**पुराणं पञ्चमो वेद इति ब्रह्मानुशासनम्।**
**यो न वेद पुराणं हि न स वेदान्त किञ्चन।।**[५]
**यस्मात् पुरा हि अनिति इदं पुराणम्**[६]
**यो विद्याच्चतुरो वेदान् साङ्गोपनिज़दो द्विजः।**
**न चेत्पुराणं संविधान्नैव स स्याद् विचक्षणः।।**[७]
**पुरातनस्य कल्पस्य पुराणानि विदुर्बुधा**[८]

व्याकरणशास्त्रदृष्ट्या पुराणशब्दस्यार्थं पुरार्थात् पुरातनमिति भवति। यास्कस्य निरुक्तानुसारेण **''पुरा नवं भवति''** इति पुराणम्। अनेन वायुपुराणानुसारं **''पुरा अनति''** अर्थात् प्राचीनकाले यो जीवितमासीदिति। पद्मपुराणानुसारं **''पुरा परम्परां वष्टि कामयेत्''** अर्थात् यः परम्परायाः कामना करोतीति, ब्रह्माण्डपुराणानुसारं **''पुरा एतत् अभूत्''** अर्थात् प्राचीनकाले एतदभूदिति पुराणम्भवतीति। पणिनीयव्याकरणानुसारं पुराणशब्दः णीञ् प्रापणे धातोः 'ड' प्रत्ययेन 'टि'लोपेन णत्वेन च (पुरा+नी+ड)**'पुराण'**शब्दः निष्पन्नो भवति। अष्टादशपुराणानि सन्ति। यथा-

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।**
**अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ।**[९]

अनेन विवरणेन मत्स्यमार्कण्डेय-भविष्यभागवत-ब्रह्माण्डब्रह्मवैवर्तब्रह्म- वामनवाराहविष्णु-वायुरग्निनारदपद्मलिङ्गगरुडकूर्मस्कन्दपुराणान्येव महापुराणानि सन्ति। पुराणेषु प्रतिपाद्यविषयान् आश्रित्येव पुराणानामाचार्याः पञ्चलक्षणानि निर्दिशन्ति। यथा-

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्च लक्षणम्।।**[१०]

1. **सर्गः** सृष्ट्युत्पत्तिवर्णनम्। 2. **प्रतिसर्गः** प्रलयस्य सृष्टेश्च पुनरुद्भवः। 3. **वंश**देवानामृषीणाञ्च वंशावल्याः वर्णनम्। 4. **मन्वन्तराणि** प्रत्येकं मनोः कालः तत्कालाधारितानाञ्च वृत्तीनां वर्णनम्। 5.**वंशानुचरितम्** सूर्यचन्द्रादिवंशजानां नृपाणां वृत्तात्मकं वर्णनम्। एकस्मिन् प्रसङ्गे वर्णनं मिलति यत् पुराणं मानवधर्मः साङ्गवेदः चिकित्सितञ्चेति चत्वारः ईश्वराज्ञया सिद्धाः सन्ति। यथा-

**पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्।**
**अज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः।।**[११]

महाभारते वर्णनं मिलति यत् **'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्**[१२]**'**इति।

पुरा अपि नवं पुराणम् इति रीत्या प्राचीनविहितस्य क्रियाकलापस्य विविधपरिस्थितौ नवप्रयोगवर्णनपरकात् पुराणम् अद्वितीयम् इति निश्चप्रचम्। पुराणप्रवाचकः सूतः स्थापत्यस्य उत्कृष्टतमः विद्वान् आसीत्। अपि च विविधेषु पुराणेषु तत्तद्देवता प्रतिपादकत्वात् तेषां समेषां क्रियाकलापादीनां प्रतिपादनं भविष्यति।

प्रायः समेषु पुराणेषु स्थापत्यकलायाः वर्णनं लभ्यते। तेषु वास्तु-शिल्प-चित्रकलानां बहवः महत्त्वपूर्णबिन्दवः क्वचित् विस्तरात् कुत्रचिच्च सङ्केतमात्रेण गोचरीक्रियन्ते। एतेषु पुराणेषु वास्तुशास्त्रीयदृष्ट्या अत्यधिकं समृद्धं पुराणं मत्स्यपुराणं विद्यते। प्रसंगात् प्रथमं संक्षिप्तेन मत्स्यपुराणानुसारं वास्तुविषयकं विवेचनं करोमि।

**मत्स्यपुराणम् -**

मत्स्यपुराणे स्थापत्यविद्यायाः अत्यधिकं व्यवस्थितं स्वरूपं प्राप्यते। अत्र प्रायः अष्टादशसु अध्यायेषु वास्तुशास्त्रीयविषया अतिविस्तरेण गदितास्सन्ति। तत्र द्विपञ्चाशदुत्तरद्विशततमेऽध्याये (अध्यायः 252) सप्तत्युत्तराधिकद्विशततमे (270) अध्याये, 254, 255, 257, 258, 259, 270, 273 एवं 292 तमेऽध्याये वास्तुशास्त्रस्य चर्चा विद्यते। 'वास्तुभूतोद्भव'- नामके आदिमे (252 तमे) अध्याये वास्तुपुरुषस्य उत्पत्तिः, भूपरीक्षणम्, एकाशीतिवास्तु-पदविन्यासः इत्यादि विषयाः वर्णितास्सन्ति। 'गृहमाननिर्णय' इत्याख्येऽध्याये सर्वतोभद्र- नन्द्यावर्त- वर्द्धमानादिभवनानाम् उल्लेखोऽस्ति। 255 तमेऽध्याये रुचक- वज्र- द्विवज्र- प्रलीनक- वृत्तेतिपञ्चानां महास्तम्भानां वर्णनं वर्तते। प्रासादनिर्देशाख्ये मण्डपलक्षणाख्ये च अध्याये मन्दिरस्थापत्यस्य प्रासादस्थापत्यस्य च विस्तृतं वर्णनमस्ति। एतदतिरिच्य प्रतिमालक्षणमपि अतिसूक्ष्मतया विवेचितमस्ति पुराणेऽस्मिन्।

**अग्निपुराणम्-**

अग्निपुराणे वास्तुशास्त्रसम्बद्धाः बहब अध्यायाः वर्तन्ते। एतेषु नगरवास्तुनः, प्रासादवास्तुनः, प्रतिमावास्तुनश्च विशिष्टं वर्णनं प्रत्यक्षीक्रियते। पुराणेऽस्मिन् प्रतिमावास्तुकलाया अतिविष्ठादतया उल्लेखोऽस्ति।

**अग्निपुराणे वास्तुविषयाः**

| क्रमाङ्कः | अध्यायः | वास्तुविषयाः |
|---|---|---|
| 1 | 24 | कुण्डनिर्माणस्य वर्णनम् |
| 2 | 38 तः 46 पर्यतम् | वास्तोः चर्चा |
| 3 | 49 तः 55 पर्यन्तम् | प्रतिमालक्षणवर्णनम् |
| 4 | 62 | देवीप्रतिष्ठाविधिः |
| 5 | 66 | सामान्यदेवप्रतिष्ठावर्णनम् |
| 6 | 92 तः 106 पर्यन्तम् | देवप्रतिष्ठाविधितः शालाभेदनिरूपणं तावत् |
| 7 | 122 | कालस्य गणना |
| 8 | 166 | कुण्डप्रमाणविधिः |
| 9 | 247 | वास्तुलक्षणादिवर्णनम् |
| 10 | 327 | देवालयस्य माहात्म्यञ्च देवालयादीना निर्माणस्यावशकता। |

**गरुडपुराणम्-**

रुडपुराणेऽपि वास्तुविद्यासम्बन्धिविषयाणां बहुविस्तरेण विवरणमुपलभ्यते। अत्र त्रिविधानाम् आवासीय-सैन्य-देवालयानां विस्तारपूर्वकं चर्चा विहिताऽस्ति। अत्र पञ्चविधानां प्रासादानां वैराज-पुष्पक-कैलाश-मालिका-त्रिविष्टपानां विवरणञ्च प्राप्यते।

**गरुडपुराणे वास्तुविज्ञयाः**

| क्रमाङ्कः | अध्यायः | वास्तुविषयाः |
|---|---|---|
| 1 | 45 | प्रासादमूर्त्तिलक्षणनिरूपणम्। |
| 2 | 46 | प्रासादुर्गदेवालयवास्तुमानानुसारेण लक्षणं निरूपणञ्च |
| 3 | 47 | प्रासादलिङ्गमण्डपादिशुभाशुभवर्णनम् |
| 4 | 48 | संक्षिप्तदेवप्रतिष्ठाविधिनिरुपणञ्च |
| 5 | 9 | यममन्दिरप्रवेशवर्णनम् |
| 6 | 11 | उर्ध्वाधोगतिज्ञापकोत्क्रमणद्वारनिरूपणम्। |
| 7 | 20 | प्रेतानां स्वगृहमित्रगृहादिषु पीडोत्पादनम् |

**कन्दपुराणम् -**

स्कन्दपुराणस्य विभिनेषु अध्यायेषु वास्तुशास्त्रीयाः विषयाः वर्णिताः सन्ति। तत्र वैष्णव- महेश्वरखण्डयोः कक्ष-मण्डपस्थानां निर्माणसम्बन्धिश्लोकाः वर्तन्ते।

**स्कन्दपुराणान्तर्गत**
**माहेश्वरखण्डान्तर्गतकौमारिकखण्डः**

| क्रमाङ्कः | अध्यायः | वास्तुविषयाः |
|---|---|---|
| 1 | 6 | विष्ठवकर्माद्वारा निर्मापिते महीनगरे स्थापना वर्णनम् |
| 2 | 35 | अथ महीसागरसंग्रामे देवानां प्रार्थनया जयस्तम्भं संस्थाप्य तदुपरि विश्वकर्मणा निर्मितस्य तष्टतीयस्य लिङ्गस्य स्तम्भेश्वरनाम्ना संस्थापनं, कूपतीर्थनिर्माणं च। |
| 3 **माहेश्वरखण्डे तृतीये उत्तरार्द्धे** | 16 | सरः खननपूर्वकं पुरनिर्माणपुरःसरारुणाचलेश्वर-मन्दिरनिर्माणम् |
| 4 **वैष्णवखण्डः** | 7 | विश्वकर्मकृतपुरालंकारादिक्रमः जगन्नाथक्षेत्रमाहात्म्यम् |
| 5 | 16 | इन्द्राद्युम्नाज्ञया देवशिल्पिनां देवालयनिर्माणम्। ततो नारदहस्तेन नरसिंहमूर्त्तिस्थापनम् |
| 6 | 23 | सतीन्द्रद्युम्नेन मयेन निर्मिते प्रासादे देवस्थापनम् |
| 7 | 25 | श्रुत्वेन द्युम्नन्नाज्ञया पद्मनिधिना स्वर्णशालानिर्माणम् नारदाज्ञया विश्वकर्मणा स्यन्दनत्रयनिर्माणम् तस्य रथस्य नारदेन स्थापनम्। तत्प्रसंगेन रथस्थापनविधिप्रकारवर्णनम्, रथध्वजे नष्टसिंहमूर्त्तिं विधाय समन्त्रकां गरुडप्रार्थनां कृत्वा रथे भगवन्मूर्त्तिप्रतिष्ठापनवर्णनम् । |
| 8 | 28 | देवताप्रतिष्ठासमयोच्चारितमंत्र-स्तद्देवानां प्रत्यक्षदर्शनं स्वस्थानावस्थानं च वेदादीनामपि प्रत्यक्षमूर्त्तिभिरागमनम् |
| 9 **स्कन्दपुराणे तृतीये ब्रह्मखण्डे** | 37 | फुलग्रामस्य क्षीरकुण्डमाहात्म्यवर्णनम् विष्ठवकर्मद्वारा मुद्गलाश्रमे विस्तीर्णकुण्डखननम्। |
| 10 **धर्मारण्यखण्डम्** | 32 | धर्मारण्यस्य पुनः पूर्ववत्सत्यमंदिरनगरं स्थितिस्थापनम् |
| 11 | 33 | जीर्णोद्धारकार्यारम्भं विधाय विविध वहिशाला, गृहशाला, ब्रह्मशालानां निर्माणपनम्, दुर्गकुण्डप्रतोली धर्मवापीकूपप्रभृतिनगरोपयोगिव्यवस्था |
| 12 **काशीखण्डे** | 1 | कुण्डमाहात्म्यसहितसांवदित्य-माहात्म्यकथनम् |
| 13 **षष्ठे नागरखण्डे** | 40 | ब्रह्मणा पृथिव्यां शिलास्थापनम् |
| 14 | 73 | धृतराष्ट्रकृतप्रासादस्थापनादि-वृतान्तवर्णनम्। |
| 15 | 75 | यज्ञभूमिमाहात्म्यवर्णनम् |
| 16 | 105 | प्रासादनिर्माणे राज्ञा प्रत्यनकरणम्। ततो भूमिखननसमये चतुर्वक्त्रलिङ्गदर्शनम्। |
| 17 | 107 | लिङ्गानां नवप्रासाद रचयित्वा स्थापनाकरणम् |
| 18 | 160 | पुष्पादित्यस्य मंदिरनिर्माणकरणम् |
| 19 | 161 | दुर्गोत्पत्तिवर्णनम् |
| 20 **प्रभासखण्डे** | 23 | चन्द्रेण शिवदत्तं लिङ्गं गृहीत्वा विश्वकर्मणा लिङ्गस्थापनायज्ञकरणम् ततः स्वर्गलोकं गत्वा प्रभासं यज्ञकर्तुं। विश्वकर्मणा यज्ञशाला, पत्नीशालादिनिर्माणम् ततश्चन्द्रेण ब्रह्मादिभिः सह यज्ञकुण्डनिर्माणम् |

**विष्णुधर्मोत्तरपुराणम् -**

वास्तुशास्त्रस्य विशदं वर्णनं विष्णुधर्मोत्तरपुराणेऽस्ति। तत्र प्रायः चत्वारिंशत्सु अध्यायेषु वास्तु-प्रतिमा-चित्रकलानां विषया वर्णिताः दृश्यन्ते। पुराणेऽस्मिन् भूचयनस्य, भूपरीक्षणस्य,

वास्तुपुरुषस्य च लक्षणं द्वितीये खण्डे एकोनविंशेऽध्याये तथा तृतीये खण्डे त्रिनवतितमेऽध्याये विद्यते। तद्यथा -

**गर्भे च कुसुमं यस्यां न म्लानम् उपगच्छति ।**
**उदकं च तया यस्यां शीघ्रं राम न जीर्यते।।**
**न निर्वाणमाप्नोति यस्यां दीपश्च भार्गव।**
**सा प्रशस्ता क्षितिस्तस्यां निवेशं कारयेद् बुधः।।**[१३]

चतुष्टि-वास्तु-पदविन्यासः भवनानां विभागश्च अध्यायेऽस्मिन्नेव वर्णितमस्ति। वृक्ष- उद्यानसम्बन्धिविषयाः पुराणेऽस्मिन् त्रिंशेऽध्याये विस्तरेण प्रतिपादिताः सन्ति। तृतीये

खण्डे नवसु अध्यायेषु चित्रकलायाः अतिविशदतया वर्णनमस्ति। भित्तिचित्रनिर्माणविधयः प्रलेप-रचनाप्रभृत्युपायैः तेषां कलानां संरक्षणं चित्राणां सत्य-वैणिक-नगर-मिश्रेतिप्रकारचतुष्टयम्, चित्रालेखनस्य विविधपद्धतय इत्यादि नैके विषया अत्र समाहिताः सन्ति। तृतीये खण्ड एव प्रायः एकादशसु अध्यायेषु मन्दिरवास्तुनः प्रासादवास्तुनश्च अतिरम्यं चित्रणं वर्तते। शतविधानां देवप्रासादानां लक्षणादयः तेषां रचनाविधिः तदर्थं शिलाचयनविधिः वज्रचूर्ण-अवलेहनिर्माणविधिश्चेत्यादयो विषया वर्णितास्सन्ति।

**विज्णुधर्मोत्तरपुराणस्य तृतीयः खण्डः**

| क्रमाङ्कः | अध्यायः | वास्तुविज्ञया: |
|---|---|---|
| 1 | 2 | प्रतिमास्वरूपस्य वर्णनम् |
| 2 | 47 | विष्णुप्रतिमानिर्माणस्य वर्णनम् |
| 3 | 74 | लिङ्गस्वरूपस्य वर्णनम् |
| 4 | 87 | चतुषष्टिदेवतायाः सामान्यप्रासादस्य लक्षणम्। |
| 5 | 91 | वर्णभेदानुसारेण प्रासादस्य इष्टिकायाः वर्णनम्। |
| 6 | 93 | नगरेषु प्रतिमायाः देवतायननिर्माणस्य भूमिचयनम् |
| 7 | 95 | वास्तुपुरूषस्य शल्याशल्यविचारः |
| 8 | 97 | प्रतिष्ठाविधिः |
| 9 | 341 | देवप्रासादस्य संस्कारः |

## ब्रह्मवैर्वतपुराणे वास्तोः वर्णनम्

| क्रमाङ्कः | अध्यायः | वास्तुविज्ञयाः |
|---|---|---|
| 1 | 2 | रत्नमण्डपः। |
| 2 | 3 | कोपमन्दिरद्वारम्। |
| 3 | 5 | राधामन्दिरषोडशद्वाराणां वर्णनम्। |
| 4 | 13 | नन्दगृहगमनगर्गगृहगमनं च। |
| 5 | 40 | हिमाचलगृहमानम् |
| 6 | 57 | पददेवताजयदौवारिक-अभयदानवर्णनम् |
| 7 | 70 | कृष्णमूर्त्तिवर्णनम् |
| 8 | 102 | सान्दीपनिगृहगमनम्। |
| 9 | 103 | द्वारकानगराऽर्थ स्थलयाचनद्वारकानिर्मातुं विश्वकर्माणं प्रत्याज्ञा द्वारकापुरं कीदृग्गुणविशिष्टं भवेदिति वर्णनम्, पुर प्रवेशस्य वर्णनम् |
| 10 | | ब्रह्मवैवर्तपुराणे ब्रह्मखण्डे शिल्पकारोत्पत्तिर्भूलोके विश्वकर्मणादिवर्णनम् |

**विष्णुपुराणम्**

| क्रमाङ्कः | अध्यायः | वास्तुविषयाः |
|---|---|---|
| 1 | 6 | दुर्गपुरखर्वटग्रामादिपृ-थिवीविभागकाराणम् |
| 2 | 22 | विश्वकर्मणा समुद्रे द्वारकानिर्माणम् |

**वाराहपुराणस्य**

| क्रमाङ्कः | अध्यायः | वास्तुविज्ञयाः |
|---|---|---|
| 1 | 92 | पुरनिर्माणम् |
| 2 | 186 | रौप्यप्रतिमास्थापनम् |
| 3 | 196 | धर्मराजपुरवर्णनम्, यमपुरप्रमाणे नानाविध समृद्धिवर्णनम् |

**भविज्यपुराणम्**

| क्रमाङ्कः | अध्यायः | वास्तुविज्ञयाः |
|---|---|---|
| 1 | 131 | सूर्यप्रतिमायाः निर्माणम् एवञ्च दारुपरीक्षणम् |
| 2 | 132 | सर्वदेवप्रतिमालक्षण-वर्णनम् |
| 3 | 133 | प्रतिमाप्रतिष्ठाविधि वर्णनम् |
| 4 | 134 | प्रतिष्ठाकामोपयुक्त-कालादिवर्णनम् |
| 5 | 135 | सर्वदेवप्रतिष्ठावर्णनम् |
| 6 मध्यमपर्वणि | 12 | प्रतिदेवताप्रतिमा-लक्षणम् |
| 7 | 13 | विविधकुण्ड-निर्णयवर्णनम् |
| 8 | 13 | विविधकुण्डनिर्णय-वर्णनम् |
| 9 | 19 | प्रतिष्ठाविधिवर्णनम् |
| 10 | 20 | गृहवास्तुदेवप्रतिज्ठा-र्चनवर्णनम् |

अनेन प्रकारेण विविधपुराणेषु बहुधा वास्तुघटकविषयाः वर्णिताः सन्ति। सर्वेषां विषयाणां विवेचमत्र निबन्धे असम्भवम्। अत एव संक्षिप्तेन वास्तुविषयाः विवेचिताः। अपरे निबन्धे पुनरन्येषां विज्ञयाणां प्रतिपादनं करिष्यामीति प्रतिपाद्यात्रैव विरमामीति शम्।

**(Footnotes)**

1 म0पु0अ053श0-4
2 निरुक्ते 3/1/34)
3 सायण ए0ब्रा0भूमिका
4 ना0पु01-9-100
5 स्कन्द.पु.बलदेव उपाध्याय इतिहास
6 वायु पु.1/102
7 वायु 1-1-100
8 म.पु.5/3/172
9 देवीभागवतम्-1/3/21
10 ष्षिव.पु. वा.सं. पूर्वभाग ख्अ.1/41
11 महाभारत अनुसाशनपर्व।
12 महाभारत आदिपर्व।
13 विष्णुधर्मोत्तरपु. खण्ड-2, अध्यायः 29/6-7

### लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# संस्कृतं सार्वभौमिकम् –चाँदकिरणसलूजा

वार्ताहरः गिरीशचन्द्रः

यमुनानगरम्- वैशाख कृष्ण चतुर्दश्यां संवत् 2075 रविवासरे यमुनानगरस्य जगाधरीस्थे सनातनधर्म-वरिष्ठ- माध्यमिक- विद्यालये जनपद-संस्कृत-सम्मेलनम् आयोजितम्। अस्मिन्नवसरे प्रो चाँद किरण सलूजा, मुख्यवक्तृरूपेण संस्कृतस्य सार्वभौमिकं स्वरूपं प्रतिपादितवान्। मुख्यातिथिरूपेण श्रीमान् ऋषिराम वासिष्ठ महोदयः संस्कृतं प्रति स्वीयं स्वीयं दायित्त्वज्ञानं भवेदिति प्रोक्तवान्। विशिष्टातिथिरूपेण डॉ सुरेन्द्र मोहन मिश्रःप्रान्ताध्यक्षः संस्कृतभारती, संस्कृतं प्रति संस्कृतशिक्षकाणां सर्वतोभावेन समर्पणम् आवश्यकमिति प्रतिपादितवान्। डॉ श्रेयांश द्विवेदी प्रान्त-उपाध्यक्षेण प्रास्ताविकं भाषणेन उक्तवान् यत् संस्कृतसम्मेलनमाध्यमेन संस्कृतभारती यमुनानगरे




संस्कृतानुरागिणां आह्वानं करोति। संस्कृतभारती उनचत्वारिंशद् देशेषु कार्यं कुर्वती जनशक्तिं मानवीयाचरणेन सुसंस्कारपूर्णां कर्तुं प्रयतते। तेनोक्तं यत् शक्तिः तु जनशक्तिः एवं न तु धनशक्तिः।



मञ्चसञ्चालनं श्री नीरजः विभागसंयोजकःकृतवान् सम्मेलनस्य संयोजनं श्रीमान् पुष्पेन्द्रः प्रान्त सम्पर्कप्रमुखःश्री गिरीश चन्द्रः जिला संयोजकः संस्कृतभारती, यमुनानगरम् कृतवन्तौ। अस्मिन्नवसरे डॉ श्याम कुमारः, श्री हरिदेव शास्त्री प्रान्तकोषप्रमुखः, डॉ रामचन्द्रःकुवि कुरुक्षेत्रम्,श्री भूपेशः प्रान्तशारीरिकप्रमुखः,श्री उदयबीरः, श्री अरुणेश्वर झा , श्रीमान् ओमप्रकाश गाँधी, श्री राजेन्द्रः अध्यक्ष संस्कृताध्यापकसंघः यमुनानगरम्, श्रीमती सुमनदेवी, डॉ कँवरपाल, श्री सतीशः, श्री यशवीर काम्बोज व्यवसायी, श्री पारेश्वर , डॉ तारकनाथ प्रभृतयः शताधिकं संस्कृतानुरागिणः सोत्साहं भागं गृहीतवन्तः।

# श्रीबृहद्गुजरात संस्कृतपरिषदा आयोजितः एकदिवसीयः राष्ट्रियः परिसंवादः सम्पन्नः

संस्कृत-साहित्य-अकादमी, गांधीनगर(गुजरात)स्य सहयोगेन श्री बृहद् गुजरात संस्कृत परिषदा कालिदासकृतिषु उपलभ्यमानानां पाठान्तराणां समीक्षामाधिकृत्य एकः एकदिवसीयः राष्ट्रियः परिसंवादः विगते मार्चमासे 28 तमे दिनाङ्के परिषदः प्राङ्गणे सम्पन्नः ।।

अस्मिन् परिसंवादे उद्घाटकरूपेण माननीयाः पूर्वन्यायमूर्तयः श्री एम.एस. परीख महोदयाः (प्रमुखाः, श्री बृ.गु.सं.परिषदः) अध्यक्षत्वेन अथ च विशिष्टसारस्वतातिथयः माननीयाः श्री प्रो. राधावल्लभ त्रिपाठी महोदयाः (पूर्वकुलपतयः, रा.सं.सं. नवदिल्ली), सारस्वतविशेषाः माननीयाः प्रो. श्री वसन्तकुमार म. भट्ट महोदयाः (अध्यक्षचराः, गुज.वि.वि.स्थस्य भाषाभवनस्य, सं.विभागस्य च) समुपस्थिताः आसन् ।

परिसंवादस्य उद्घाटनसत्रस्यानन्तरं विदुषां प्रासङ्गिकानि वक्तव्यानि जातानि । तत्र प्रथमं व्याख्यानम् प्रो. वसन्तकुमार भट्टमहोदयानाम् संजातम् । तैः कालिदासीय-काव्येषु दृश्यमानानां पाठान्तराणां विषये स्वीयः मतः प्रस्तुतः । स च मतः काव्यशास्त्रिभिः प्रदर्शितान् काव्यदोषान् दूरीकर्तुम् कालान्तरे कालिदासीयकाव्येषु पाठान्तराणि कृतानि सन्तीति । तदनन्तरं माननीयैः प्रो. राधावल्लभ त्रिपाठिमहोदयैः स्वीयं वक्तव्यं प्रस्तुतम् । तैः बहुभिः प्रमाणैः प्रस्थापितं यद् कालिदासीय-काव्येषु पाठान्तराणां प्रवेशकारणानि बहूनि सन्ति । काव्यशास्त्रिभिः प्रदर्शिताः दोषाः महान्तः कवयः अपि कदाचित् दोषभागिनः भवन्ति, तदा नवीनैः सदा स्वकीये काव्यकर्मणि सततं सावधानेन भवितव्यम् इत्युपदेशधियाः सन्ति ।



अस्मिन् प्रसङ्गे श्री बृ ग सं परिषदः पूर्वप्रमुखानां माननीयानां न्यायमूर्तीनां श्री डी.ए. देसाई महोदयानां तैलचित्रस्य अनावरणं माननीयैः श्री गिरिशभाई टी. नाणावटी महोदयैः विहितम् । एते श्री गिरिशभाई महोदयाः पूर्वं दिल्लीनगरस्थे उच्चतमन्यायालये न्यायमूर्तिरूपेण स्वीयां सेवां दत्तवन्तः, अधुना निवृत्ताः सन्ति । एतैः विविधायोगमध्येऽपि स्वीया सेवा प्रदत्ता वर्तते ।

परिषदा प्रकाशितस्य एकस्य पुस्तकस्य लोकार्पणमपि समुपस्थितैः महानुभावैः विहितम् । एतच्च पुस्तकम् सुखबोधाय सुभाषितानि इति नाम्ना कविवर्यैः श्री वासुदेव पाठकैः रचितमस्ति । एते श्रीमन्तः वासुदेव पाठकमहोदयाः वर्तमाने परिषदः प्रधानसचिवपदम् अलंकुर्वन्ति । अस्मिन् लघुनि पुस्तके तैः सरलसंस्कृतभाषासम्पन्नानि स्वनिर्मितानि सुभाषितपद्यानि संगृहीतानि सन्ति । तेषां गुर्जर-हिन्दी-आङ्ग्लभाषासु अनुवादः अपि प्रकाशितः वर्तते ।

परिसंवादे प्रो. कमलेशकुमार चोकसी वर्यैः मालविकाग्निमित्रे समुपलब्धानि कानिचित् पाठान्तराणि प्रदर्शय अत्रापि पाण्डुलिपीनां समीक्षणपूर्वकं संशोधनमपेक्षितमस्ति । पात्राणां संवादेषु क्वचित् क्वचित् स्खलनानि अपि दृश्यन्ते । क्वचित् च रंगसूचनासु पाठभेदकारणात् नटकार्ये भिन्नता परिदृश्यते ।

आदिनं पञ्च व्याख्यानानि संजातानि । उपस्थितैः नवोदितैः विंशतिसंख्यकैः संस्कृताध्यापकैः अपि स्वकीयाः शोधालेखाः प्रस्तुताः ।

परिसंवादे अस्मिन् कालिदासीयकृतीनाम् विविधलिप्यासनस्थितानां विविधलिपिलिखितानां पाण्डुलिपीनाम् विवरणपुरःसरम् एकम् अद्भूतम् सुदूर्लभम् प्रदर्शनमपि आयोजितमासीत् । अस्य निखिलस्यापि कार्यक्रमस्य संयोजनं प्रा. वासुदेव पाठक (प्रधानमन्त्री, परिसंवादस्य मुख्यसंयोजकश्च), डो. गीताबहेन पी. महेता , डो. महेश ए. पटेल (परिसंवादसंयोजकाः) डो. चन्द्रकान्त महेता, एडवोकेट एस.एन. शेलत (परिषदः उपप्रमुखौ), प्रो. अजयसिंह चौहाण (महामात्रः, सं.सा.अकादमी, गांधीनगर) इत्यादिभिः नैकैः महानुभावैः संमिल्य कृतम् ।।

# श्रीभगवानदाससंस्कृतमहाविद्यालये अखिलभारतीयशोधसम्मेलनस्यायोजनम्

हरिद्वारम्। सुप्रसिद्धे श्रीभगवानदाससंस्कृतमहाविद्यालये मार्चमासस्य त्रिंशत्तमे दिनाङ्के अखिलभारतीयं शोधसम्मेलनं समायोजितम्। सम्मेलनेऽस्मिन् श्रीलालबहादुरसंस्कृतविद्यापीठस्य विख्यातनामानः कुलपतिवर्याः प्रोरमेशपाण्डेयमहोदयाः देवगिरा स्वकीयं वक्तव्यं प्रस्तूय सर्वानपि सहृदयान् विजितवन्तः। एभिः भारतीयां संस्कृतिं प्रति निष्ठावन्तः संस्कृतं हृदये दधानाः सुरभरतीविकासे कटिवद्धाः संस्कष्तसेवकान् प्रति श्रव्यं भावं प्रकटीकृतवन्तः। अस्मिन्नेव सम्मेलने उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपितचराः प्रसृतयशसः प्रोमहावीरप्रसादअग्रवालमहोदयाः संस्कृतं संस्कृतविदुषः संस्कष्तसेविनः भूरिशः श्रवणीयया वाचा समलंकष्तवन्तः। देवसंस्कृतिविश्वविद्यालयस्य प्रो राधेश्यामद्विवेदिमहोदयाः संस्कष्तसंवर्धनाय स्वविचारान् प्रकटीकष्तवन्तः। अस्य सम्मेलनस्य अभिनन्दभाषणं अद्वितीयवाचा प्राचार्यवरैः डॉ भोलानाथझामहोदयैः पीयूषवर्षणमिव कृतम्। प्राचार्यमहोदयानां वाणीं श्रावं श्रावं मनो नर्तितुं लग्नम्। संचालनं सुकविः डॉ निरंजनमिश्रमहोदयेन कृतम्। अस्मिन्नेवावसरे डॉ अरविन्दकुमारतिवारिविरचितः नीतिकल्पद्रुमः लोकार्पितः कुलद्वयकरकमलैः। किं च श्रीमतां निरंजनमिश्राणां नव्या कष्तिः रमणीयादपि रमणीयम् इत्यस्यापि लोकार्पणं श्रीमद्भिः कष्तम्। सम्मेलनेऽस्मिन् विषययुगं निर्धारितमासीत्–







1 संस्कृतशास्त्रीयग्रन्थेषु मानवीयमूल्यानि।

2 आधुनिकसंस्कृतकाव्येषु मानवीयमूल्यानि च।

अस्मिन् भारतदेशस्य अनेकप्रदेशात् सगागताः विद्वांसः स्वशोधपत्रवाचनं कष्तवन्तः। अत्र उत्तराखण्डसंस्कष्तविश्वविद्यालयस्य व्याकरणविभागाध्यक्षः डॉ शैलेशतिवारिणः दिल्लीतः डॉ शिवशंकरशुक्लः, सागरतः डॉ नौनिहालगौतमः, डॉ प्रकाशपन्तः, डॉ अरविन्दनारायणमिश्रः,पवलतः डॉ राजकुमारमिश्रः, राजस्थानतः डॉ पूर्णचन्द्रमहोदयः, डॉ बनमालीविस्वालः, दिल्लीतः डॉ सुन्दरनारायणझाः बागपतः डॉ अरविन्दकुमारतिवारी अन्ये बहवः उपस्थिता विद्वांसः सम्मेलनं सफलीकृतवन्तः। सायंकाले काव्यपाठः कृतः कविभिः। महाविद्यालयस्य डॉसिंहदेवमहोदयः, डॉ मंजुनाथः अन्ये सर्वेऽपि स्वसहयोगेन सर्वमपि दर्शनीयं विहितवन्तः।

# 23वां देवीशंकरअवस्थी सम्मानः प्राप्तवन्तः अमिताभरायः

संवाददाता नवदेहली। राजधानी स्थित साहित्यअकादमी सभागारे आयोजित समारोहे वृहस्पतिवासरे वरिष्टालोचक नन्दकिशोरआचार्यः विश्वनाथत्रिपाठि व अशोकवाजपेयः वर्ष 2017 इत्यस्य 23वां देवशंकरअवस्थी सम्मानः युवा आलोचक अमिताभरायं प्रदत्तवान। सम्मानोऽयं कवि मुक्तबोधे केन्द्रित तस्य आलोचना पुस्तक सभ्यतायाः




यात्रा अन्धकारे पुस्तकाय दत्तवान।

सम्मानस्यान्तर्गत साहित्यकारं प्रशस्तिपत्रं, स्मृतिचन्ह एवं 11 सहस्त्र धनमवि दत्तवान। अस्मिन्नवसरे दिवंगत कवि चंदकांतदेवताले केदारनाथसिंह व शुशीलसिद्धार्थस्य स्मृते मौनमपि स्थापितवान। वरिष्ठ साहित्यकार विश्वनाथत्रिपाठि उक्तवान् यत् देवीशंकरअवस्थी इत्यस्य कृति विवेकस्य रङ्गनैव तस्य गम्भिरता आलोकयति। वस्तुतः ग्रन्थोऽयं नवीन आलोचनायाः भूमिका अस्ति। अस्यां रचनावल्यां तस्य समयस्य श्रेष्ठ संकलितोऽस्ति। ते उक्तवन्तः यत् रचनया आलोचनां एतादृशं अनुभव भवति। यत् सः श्रेष्ठ प्रयासः करोति स्म। यदि दुःखद घटना न भवेत् तर्हि तेषां कृतित्वं विशाल रूपेण द्रष्टुं शक्यते।

कवि एवं साहित्यकार अशोकवाजपेय उक्तवान यत् देवीशंकरअवस्थी निर्भिकः आसीत्। ते स्व गुरू हजारीप्रसाद द्विवेदीकृत गन्थस्य आलोचना कृतवान। एवं तस्य समयस्य कविनां कृतिमपि आलोचना कृतवान।

अमिताभरायः उक्तवान यत् समाजः सरोकारेण सह युक्तो भवति अद्य अष्टाशिति प्रतिशत आलोचना अतार्किको भवति। अकादमिक आलोचनायाः अनन्तरमपि आलोचनायाः वृत्तोऽस्ति। प्रत्येक समालोचना स्व समयस्य आलोचना भवति।

अस्मिन्नवसरे देवीशंकरअवस्थीमहोदयस्य जाया कमलेशअवस्थी सहित अन्य साहित्यकाराः उपस्थिताः आसन्। तत्रैव तेषां रचनावल्या आदि विमोचनमभवत्। ज्ञातोऽस्ति यत् कमलेशवस्थी द्वारा अयं 1995 इशवी मध्ये अयं समानस्य स्थापना अभवत्। सम्मानोऽयं तेषां जन्मदिवशे प्रतिवर्श 45 वर्षस्य कस्यापि युवाआलोचकं ददाति।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।